## तुदादिगणः

तुदादिगणे, कर्त्रर्थे सार्वधातुकप्रत्यये परे धातुभ्यः श–विकरणप्रत्ययः विहितः अस्ति। वस्तुतः प्रथमं **कर्तरि शप्** (३.१.६८) इत्यनेन शप् विहितः, तदा **कर्तरि शप्** इति सूत्रं प्रबाध्य **तुदादिभ्यः शः** (३.१.७७) आगत्य कार्यं करोति। किमर्थम् ? अस्यां दशायां **तुदादिभ्यः शः** स्वस्य कार्यं न करोति चेत् इदं सूत्रं निरवकाशं भविष्यति। **कर्तरि शप्** इत्यस्य अन्यत्रलब्धावकाशः अस्ति। अतः **तुदादिभ्यः शः**, **कर्तरि शप्** इत्यस्य अपवादभूतसूत्रम्। **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** इति परिभाषया यत् सूत्रं अपवादः अस्ति, तत् अपरस्य अपेक्षया बलवत्। अतः अत्र **तुदादिभ्यः शः** इति सूत्रस्य कार्यं सिध्यति।

**तुदादिभ्यः शः** (३.१.७७) = तुदादिगणे स्थितेभ्यः धातुभ्यः श–प्रत्ययः भवति, कर्त्रर्थक–सार्वधातुकप्रत्यये परे। तुद् आदिर्येषां ते, तुदादयः बहुव्रीहिसमासः, तेभ्यः तुदादिभ्यः। तुदादिभ्यः पञ्चम्यन्तम्, शः प्रथमान्तम्, द्विपदमिदं सूत्रम्। **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः; **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः। **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः; **धातोरनेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः। अनुवृत्ति–सहितसूत्रम्— **तुदादिभ्यः धातुभ्यः श प्रत्ययः परश्च कर्तरि सार्वधातुके** ।

**कर्तरि शप्** (३.१.६८) = धातुतः शप्–प्रत्ययः भवति, कर्त्रर्थक–सार्वधातुकप्रत्यये परे। अनुवृत्ति–सहितसूत्रम्— **धातोः शप् प्रत्ययः परश्च कर्तरि सार्वधातुके**।

अयं श–प्रत्ययः शित् इति कारणतः **तिङ्शित्सार्वधातुकम्** (३.४.११३) इति सूत्रेण सार्वधातुकप्रत्ययः। तस्मात् कारणात्, श–प्रत्ययः परश्चेत्, **सार्वधातुकार्धधातुकयोः** (७.३.८४) **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्राभ्यां गुणकार्यं विहितम्। परन्तु श अपित्, अतः **सार्वधातुकमपित्** (१.२.४) इति सूत्रेण ङिद्वत्। ङिद्वत् अतः **क्क्ङिति च** (१.१.५) इति कारणतः यत्र यत्र गुण–कार्यं विहितम्, तत्र तत्र निषिद्धम्।

**सार्वधातुकमपित्** (१.२.४) = अपित् सार्वधातुकम् ङित् इव अस्ति। सार्वधातुकम् प्रथमान्तम्, अपित् प्रथमान्तं, द्विपदमिदं सूत्रम्। **गाङ्कुटादिभ्योऽञ्णिन्ङित्** (१.२.१) इत्यस्मात् **ङित्** इत्यस्य अनुवृत्तिः। अनुवृत्ति–सहितसूत्रम्— **सार्वधातुकम् अपित् ङित्**।

**क्क्ङिति च** (१.१.५) = यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तस्मात् प्रत्ययात् पूर्वं तस्य एव प्रत्ययस्य कारणतः इकः स्थाने गुणः वा वृद्धिः वा भवति स्म, सः (गुणः वृद्धिः) न भवति। ग् च क् च ङ् च तेषाम् इतरेतरद्वन्द्वः क्क्ङः; क्क्ङः इतः यस्य सः क्क्ङित्, तस्मिन् परे क्क्ङिति। द्वन्द्वगर्भबहुव्रीहिसमासः। अत्र ग्–स्थाने ककारः **खरि च** इत्यनेन चर्त्वसन्धिः। क्क्ङिति सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम्। **इको गुणवृद्धी** (१.१.३) इत्यस्य पूर्णतया अनुवृत्तिः; **न धातुलोप आर्धधातुके** (१.१.४) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः। अनुवृत्ति–सहितसूत्रम्— **क्क्ङिति च इकः गुणवृद्धी न**।

आहत्य तुदादिगणे कर्त्रर्थे सार्वधातुकप्रत्यये परे श–प्रत्ययः विहितः। श च ङिद्वत्। अस्य एकः परिणामः गुणनिषेधः। परन्तु यथा दृष्टं दिवादिगणे प्रत्ययस्य ङिद्वत् इति भवनेन केवलं गुणनिषेधः सिद्धः इति न; तस्य अनेके प्रभावाः सन्ति। तेषु त्रयः प्रमुखाः अधोलिखिताः।

कितिङिति विशिष्ट–कार्याणि

यः कोऽपि प्रत्ययः कित् ङित् भवति, तं प्रत्ययं निमित्तीकृत्य पूर्वं स्थिते अङ्गे यथासङ्गं त्रीणि विशिष्टकार्याणि प्रवर्तनीयानि—
१) अङ्गान्ते उपधायां च इकः गुणः निषिद्धः | तुदादौ तुद् + श + ति → तुदति | **क्क्ङिति च** (१.१.५) |
२) अनिदित्–धातूनाम् उपधायां न्–लोपः | येषां हलन्तधातूनाम् इत्–संज्ञकः ह्रस्वः इकारः नास्ति, तेषां धातूनाम् उपधायां नकारः अस्ति चेत्, तस्य लोपो भवति | तृम्फ् + श + ति → न्–लोपः | **अनिदितां हल उपधाया क्ङिति** (६.४.२४) | परन्तु तुदादितणे विशिष्ट–वार्तिकेन एषां पुनः नुमागमः आनीयते | **शे तृम्फादीनां नुम्वाच्यः** | तृम्फ् + श + ति → न्–लोपः → तृफ् + अ + ति → नुम्–आगमः → तृम्फ् + अ + ति → तृम्फति |
३) सम्प्रसारणिनां धातूनाम् सम्प्रसारणम् | यण्–स्थाने इक्–आदेशः (यण्–सन्धौ यथा भवति, तस्य विपरीतक्रमः), कितिङिति प्रत्यये परे | व्रश्च् + श + ति → वृश्चति | **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) |

धेयं यत् दिवादिगणे तुदादिगणे च यद्यपि उभयत्र विकरणः अपित् (श्यन्, श), तथापि सर्वत्र तयोः कार्यं समानं नास्ति; भेदाः सन्ति यतोहि श्यन् → य हलादिः अपित् प्रत्ययः; श → अ अजादिः अपित् प्रत्ययः | हलादि–अजादि–भेदात् कार्ये भेदाः सन्ति | परन्तु उपरितन–नियमत्रयं सार्वत्रिकम् | नाम कित् ङित्–प्रत्यये परे, एषां त्रयाणां कार्यं भवत्येव | एषु त्रिषु नियमेषु—गुण–निषेधः, न्–लोपः, सम्प्रसारणम् इत्येषु—प्रत्ययस्य हलादि–अजादि–भेदात् न कोऽपि प्रभावः |

किन्तु अन्यत्र हलादि–अजादि–भेदेन कार्ये भेदः | यद्यपि कार्ये कित्–ङित् इति प्रसङ्गः अस्ति, परन्तु सूत्रेषु "हलादि परे", "अजादि परे" इति कुत्रचित् उक्तम् | यथा प्रत्ययः हलादिः कित्–ङित् चेत्, **हलि च** (८.२.७७) इत्यनेन रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्–वर्णः दीर्घो भवति | दिवादिगणे श्यन् हलादिः अतः इदं कार्यं भवति (जॄ + य → जिर् + य → **जीर्** + य → जीर्यति); तुदादौ श अजादिः अतः न भवति | अन्यत्र प्रत्ययः अजादिः कित्–ङित् चेदेव भवति | यथा **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इति सूत्रेण अचि (कितिङिति) परे, इकारान्त–उकारान्तधातुरूपि–अङ्गस्य इकारस्य उकारस्य स्थाने क्रमशः इयङ् उवङ् आदेशः भवति | रि + अ + ति → र् + इय् + अ + ति → रियति | दिवादौ श्यन् हलादिः अतः इदं कार्यं न सम्भवति |

अन्यानि कित्–ङित्–निमित्तकानि कार्याणि यथासङ्गं वक्ष्यन्ते |

अधुना तुदादिदिगणे सार्वधातुकलकाराणां रूपाणि कथं भवन्ति इति वीक्षताम् | तुदादिगणः प्रथमधातुगणसमूहे, नाम अस्मिन् गणे अङ्गं सर्वत्र अदन्तम् | श–प्रत्ययस्य शकारस्य इत्–संज्ञा **लशक्वतद्धिते** (१.३.८) इति सूत्रेण, **तस्य लोपः** (१.३.९) इत्यनेन तस्य लोपः; 'अ' इत्यवशिष्यते | तुदादिगणीयः धातुः यः कोऽपि भवतु नाम, अङ्गस्य अन्ते "अ" इति विकरण–सम्बद्ध–अकारः भवति एव | यथा लिख् + अ → लिख |

पूर्वमेव अस्माभिः सार्वधातुकलकारेषु (लट्, लोट्, लङ्, विधिलिङ् इत्येषु) तिङ्–प्रत्ययाः साधिताः | पूर्वतनेपाठे अदन्ताङ्ग–तिङ्प्रत्यययोः संयोजनं कथं भवति परस्मैपदे आत्मनेपदे च इति अवलोकितम् | अधुना तुदादिगणे यावन्तः धातवः सन्ति, तेषां सर्वेषां धातूनां कृते अङ्ग–निर्माण–विधिः अस्माभिः ज्ञायेत | अङ्गस्य सामान्य–चिन्तनं किं, विशेष–चिन्तनं किम् इति ज्ञेयम् | एकवारम् अङ्गं

निर्मितं, ततः अग्रे चतुर्णां लकाराणां कृते अवशिष्टं सर्वं (सिद्धतिङ्प्रत्ययाः के, अपि च अङ्ग–तिङ्प्रत्यय–संयोजनविधिः) अस्माभिः ज्ञायते एव | अतः आहत्य, अधुना केवलम् अदन्तम् अङ्गम् अपेक्षते; हस्ते अङ्गम् अस्ति चेत्, लटि, लोटि, लङि, विधिलिङि च तिङन्तबुद्धिः प्राप्ता |

तर्हि अस्माकं कुञ्चिका अस्ति अङ्गम्; अङ्गं ज्ञायते चेत्, लटि, लोटि, लङि, विधिलिङि च सर्वाणि रूपाणि ज्ञायन्ते |

एकवारं तुदादिगणे, चतुर्णां लकाराणां तिङन्तरूपाणि कथं सन्ति इति पश्येम | तदा एवमेव अग्रे कस्यचिदपि धातोः अदन्ताङ्गस्य ज्ञानेन, सर्वाणि तिङन्तरूपाणि ज्ञास्यन्ते | अत्र दृष्टान्ते परस्मैपदे चल्–धातुः, अङ्गम् अस्ति चल् + श → चल |

| लटि सिद्ध–प्रत्ययाः— | | | लट्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| ति | तः | अन्ति | चलति | चलतः | चलन्ति |
| सि | थः | थ | चलसि | चलथः | चलथ |
| मि | वः | मः | चलामि | चलावः | चलामः |

| लोटि सिद्ध–प्रत्ययाः— | | | लोट्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| तु, तात् | ताम् | अन्तु | चलतु / चलतात् | चलताम् | चलन्तु |
| ०, तात् | तम् | त | चल/चलतात् | चलतम् | चलत |
| आनि | आव | आम | चलानि | चलाव | चलाम |

| लङि सिद्ध–प्रत्ययाः— | | | लङ्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| त् | ताम् | अन् | अचलत् | अचलताम् | अचलन् |
| स् | तम् | त | अचलः | अचलतम् | अचलत |
| अम् | व | म | अचलम् | अचलाव | अचलाम |

| विधिलिङि सिद्ध–प्रत्ययाः— | | | विधिलिङ्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| इत् | इताम् | इयुः | चलेत् | चलेताम् | चलेयुः |
| इः | इतम् | इत | चलेः | चलेतम् | चलेत |
| इयम् | इव | इम | चलेयम् | चलेव | चलेम |

तुदादिगणे, आत्मनेपदे मृङ्–धातुः प्राणत्यागे, अङ्गम् अस्ति मृ + श → म्रिय

| लटि सिद्ध–प्रत्ययाः— | | | लट्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| ते | इते | अन्ते | म्रियते | म्रियेते | म्रियन्ते |
| से | इथे | ध्वे | म्रियसे | म्रियेथे | म्रियध्वे |

| | | | | | |
|---|---|---|---|---|---|
| ए | वहे | महे | म्रिये | म्रियावहे | म्रियामहे |

| लोटि सिद्ध–प्रत्ययाः— | | | लोट्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| ताम् | इताम् | अन्ताम् | म्रियताम् | म्रियेताम् | म्रियन्ताम् |
| स्व | इथाम् | ध्वम् | म्रियस्व | म्रियेथाम् | म्रियध्वम् |
| ऐ | आवहै | आमहै | म्रियै | म्रियावहै | म्रियामहै |

| लङि सिद्ध–प्रत्ययाः— | | | लङ्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| त | इताम् | अन्त | अम्रियत | अम्रियेताम् | अम्रियन्त |
| थाः | इथाम् | ध्वम् | अम्रियथाः | अम्रियेथाम् | अम्रियध्वम् |
| इ | वहि | महि | अम्रिये | अम्रियावहि | अम्रियामहि |

| विधिलिङि सिद्ध–प्रत्ययाः— | | | विधिलिङ्–लकारे तिङन्तरूपाणि— | | |
|---|---|---|---|---|---|
| ईत | ईयाताम् | ईरन् | म्रियेत | म्रियेयाताम् | म्रियेरन् |
| ईथाः | ईयाथाम् | ईध्वम् | म्रियेथाः | म्रियेयाथाम् | म्रियेध्वम् |
| ईय | ईवहि | ईमहि | म्रियेय | म्रियेवहि | म्रियेमहि |

अग्रे केवलम् अङ्गं च लट्–लकारस्य प्रथमपुरुषैकवचनान्तरूपं दीयेते | ततः चतुर्णां लकारणां सर्वाणि रूपाणि ज्ञायन्ते |

धातवः चतुर्दशविधाः इत्यस्माभिः पूर्वमेव ज्ञातम् | अजन्तधातवः अन्त्यक्रमेण आयोजिताः; हलन्तधातवः उपधा–क्रमेण विभक्ताः | अजन्तधातवः— अकारान्ताः, आकारान्ताः, इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः, ऋकारान्ताः, ॠकारान्ताः, एजन्ताः च | हलन्तधातवः— अदुपधाः, इदुपधाः, उदुपधाः, ऋदुपधाः, शेषधातवः चेति | तर्हि अनेन आयोजनेन अग्रे सामान्यधातवः येषां तुदादौ किमपि अङ्गकार्यं नास्ति, तानि सूच्यन्ते; तदा विशेषधातूनां कार्याणि सूच्यन्ते |

## तुदादिगणः (157 धातवः)

### A. सामान्यधातवः (114 धातवः)

एषां धातूनां कृते अङ्गनिर्माण–समये किमपि कार्यं नास्ति | केवलं वर्णमेलनम् | तुदादिगणे अजन्तधातूनां सर्वेषां विशिष्टम् अङ्गकार्यं भवति, अतः एषु धातुषु न कोऽपि सामान्यः | हलन्तधातुषु लघु–इगुपधधातुः चेत् **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः, तदा **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इत्याभ्यां गुणनिषेधः | तदा शेषधातूनां किमपि कार्यं तु न भवति एव |

अदुपधधातवः (4 धातवः)

चल विलसने (गच्छति, गतिमान् भवति) → चल् + श → चल् + अ → चल इति अङ्गम् → चल + ति → चलति

त्वच संवरणे (आच्छादनं करोति) → त्वच् + श → त्वच इति अङ्गम् → त्वच + ति → त्वचति

ओलजी व्री भ्वादिगणे शप् पित् अतः सर्वत्र इगन्तधातौ गुणः— नी → ने, भू → भो, डायाम् (लज्जितः भवति) → लज् + श → लज इति अङ्गम् → लज + ति → लजति

कड मदे (अहङ्ग्कारयुक्तः भवति) → कड् + श → कड इति अङ्गम् → कड + ति → कडति

अत्र कश्चन प्रश्नः उदेति— भ्वादिगणः इति सामान्यं, तुदादिगणः इति विशेषः | नाम यत्र 'अ' इति विकरणम् अपि च धातोः व्यवहारः सामान्यः, तत्र स च धातुः पाणिनिना भ्वादिगणे स्थापितः | यदि 'अ' इति विकरणं परन्तु धातोः व्यवहारः सामान्यो न (यथा लिख्–धातुः, यस्य उपधा–गुणो न भवति → लिखति), तदानीमेव पाणिनिना सः धातुः तुदादिगणे स्थाप्यते | नो चेत् भ्वादिगणः इति 'अ'–विकरणान्ताङ्गानां सर्वेषां धातूनां पात्रम् | प्रश्नः अयम्— अदुपधधातूनां किमपि विशिष्टं कार्यं तु न भवति खलु; तर्हि कुतः तुदादिगणे इमे धातवः स्थापिताः ? अस्य उत्तरम् अग्रे अस्मिन् पाठे प्राप्स्यते |

<u>इदुपधधातवः</u> (23 धातवः)

एषां लघूपध–इकारस्य गुणो न भवति अतः तुदादिगणे पाणिनिना इमे धातवः स्थापिताः |

लिख अक्षरविन्यासे → लिख् + श → लिख् + अ → लिख इति अङ्गम् → लिख + ति → लिखति

ओविजी भयचलनयोः (आपद्ग्रस्तं करोति नाम भाययति, आपद्ग्रस्तः भवति नाम भयं अनुभवति) → विज् → विज इति अङ्गम् → उद्विजते

विध विधाने (क्रमेण आयोजयति) → विध् → विधति

क्षिप प्रेरणे (प्रेषयति) → क्षिप् → क्षिपति/ते | **अभिप्रत्यतिभ्यः क्षिपः** (१.३.८०) इत्यनेन अभि, प्रति, अति इति उपसर्गाः पूर्वं चेत्, परस्मैपदी एव अयं धातुः | अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति |

डिप क्षेपे (प्रेषयति) → डिप् → डिपति

रिफ कत्थनयुद्ध–निन्दाहिंसादानेषु (युध्यते इत्यादिकम्) → रिफ् → रिफति

किल श्वैत्यक्रीडनयोः (श्वेतः भवति, क्रीडति) → किल् → किलति

तिल स्नेहने (स्नेहः भवति [greasy, oily]; तैलम् आदधाति/आचरति) → तिल् → तिलति

चिल वसने (वस्त्रं शरीरे स्थापयति) → चिल् → चिलति

इल स्वप्न–क्षेपणयोः (निद्रां करोति, प्रेषयति) → इल् → इलति

विल संवरणे (छिद्रं करोति, भग्नं करोति, आच्छादयति) → विल् → विलति

बिल भेदने (छेदयति, भागे–भागे विभागं करोति) → बिल् → बिलति

णिल गहने (कठिनतया बोधति) → निल् → निलति

हिल भावकरणे → हिल् → हिलति

मिल सङ्गमे → मिल् → मिलति
शिल उञ्छे → शिल् → शिलति
षिल उञ्छे → सिल् → सिलति
दिश अतिसर्जने → दिश् → दिशति/ते
रिश हिंसायाम् → रिश् → रिशति
लिश गतौ → लिश् → लिशति
विश प्रवेशने → विश् → विशति | **नेर्विशः** (१.३.१७) इत्यनेन नि–उपसर्गपूर्वकः विश्–धातुः आत्मनेपदी → निविशते | विशति he enters; निविशते he enters in | अत्र उक्तं यत् 'नि' उपसर्गः भवेत्; नो चेत् परस्मैपदे एव— मधुनि विशन्ति भ्रमराः | अत्र 'नि' इति सप्तमीविभक्त्यात्मकं, न तु उपसर्गः |

उदुपधधातवः (55 धातवः)

तुद व्यथने (पीडनं करोति, दुःखं प्रापयति) → तुद् + श → तुद इति अङ्गम् → तुद + ति → तुदति

कुच → कुच्, गुज → गुज्, रुजो → रुज्, भुज → भुज्, कुट → कुट्, पुट → पुट्, स्फुट → स्फुट्, मुट → मुट्, तुट → तुट्, चुट → चुट्, छुट → छुट्, जुट → जुट् इत्यादयः पञ्च–पञ्चाशत् धातवः | (एते धातवः लोके अप्रसिद्धाः |)

ऋदुपधधातवः (21 धातवः)

सृज विसर्गे (सृष्टिं करोति, रचयति) → सृज् + श → सृज् + अ → सृज इति अङ्गम् → सृज + ति → सृजति
स्पृश संस्पर्शने (स्पर्शं करोति) → स्पृश् + श → स्पृश् + अ → स्पृश इति अङ्गम् → स्पृश + ति → स्पृशति
कृष विलेखने (कृषिकार्यं करोति) → कृष् + श → कृष् + अ → कृष इति अङ्गम् → कृष + ति → कृषति

ऋच → ऋच्, कृड → कृड्, मृड → मृड्, पृड → पृड्, पृण → पृण्, वृण → वृण्, मृण → मृण्, चृती → चृत् इत्यादयः एकविंशतिः धातवः |

शेषधातवः (10 धातवः)

चर्च परिभाषण–भर्त्सनयोः (चर्चां करोति, विचार–विमर्शं करोति) → चर्च् + श → चर्च् + अ → चर्च इति अङ्गम् → चर्च + ति → चर्चति

उच्छी → उच्छ्, ऋच्छ → ऋच्छ्, मिच्छ → मिच्छ्, उछि → उञ्छ्, उब्ज → उब्ज्, जर्ज → जर्ज्, झर्झ → झर्झ्, उज्झ → उज्झ्, घूर्ण → घूर्ण्

शेषधातुषु किमपि विशिष्टं गणनिमित्तकं कार्यं न दृष्यते | भ्वादिगणः सामान्यं, तुदादिगणः विशेषः इति उक्तं पूर्वं; तर्हि किमर्थम् एते शेषधातवः तुदादिगणे सन्ति न तु भ्वादिगणे ? उत्तरम् अस्ति यत् अत्रापि विशिष्टं गणनिमित्तकं कार्यम् अस्ति | **आच्छीनद्योर्नुम्** (७.१.८०) इत्यनेन तुदादौ शतरि स्त्रीयां नुम्–आगमः वैकल्पिकः अस्ति | यथा बालिका चर्चन्ती गच्छति/बालिका चर्चती गच्छति | यावन्तः धातवः तुदादिगणे सन्ति, तेषां सर्वेषां शतरि स्त्रियां नुम्–विकल्पो भवति | अदुपधधातवः चल् इत्यादयः अपि अनेन एव कारणेन तुदादिगणे सन्ति | एषां धातूनाम् अङ्गम् अदन्तम्, अतः भ्वादिगणे यदि अभविष्यन् तर्हि स्त्रियां शत्रन्तं रूपं चर्चन्ती इत्येव अभविष्यत्, न तु चर्चती | इदं वैशिष्ट्यं सर्वेषां तुदादिगणीयधातूनां कृते प्रवर्तते |

**B.** विशेषधातवः (44 धातवः)

1. इगन्तधातवः (16 धातवः)

इगन्तधातवः = इक्–प्रत्याहारे कश्चन सदस्यः अन्ते येषां ते | इक्–प्रत्याहारः नाम इ, उ, ऋ, ऌ | अतः अस्मिन् इकारान्तधातवः, उकारान्तधातवः, ऋकारान्तधातवः च अन्तर्भूताः |

एतावता अस्माभिः दृष्टं यत् इगन्तधातवः नियमानुसारं प्रवर्तन्ते | भ्वादिगणे दिवादिगणे च गणनियमम् अनुसृत्य यथा विकरणप्रत्ययस्य स्वभावः, तथा एव इगन्तधातूनाम् अङ्गकार्यम् | भ्वादिगणे शप् पित् अतः सर्वत्र इगन्तधातौ गुणः— नी → ने, भू → भो, धृ → धर् इति | दिवादिगणे श्यन् अपित् अतः सर्वत्र इगन्तधातुः यथावत् तिष्ठति— प्री → प्रीय → प्रीयते, सू → सूय → सूयते इति | अतः भ्वादिगणे दिवादिगणे च इगन्तधातवः सामान्याः इति उच्यते | परन्तु तुदादिगणे इगन्तधातवः विशेषधातवः सन्ति | किमर्थमिति अत्र दृश्यताम् |

श इति विकरणप्रत्ययः | अयं श–प्रत्ययः सार्वधातुकः (**तिङ्–शित्सार्वधातुकम्**), अपित् (पकारः इत् यस्य न), ङिद्वत् (**क्ङिति च**), अजादिः (अच् आदौ यस्य सः) च | अतः सङ्क्षेपे अजादिः अपित् इति वदेम |

एतावता वयं दृष्टवन्तः यत् व्याकरणशास्त्रे इ, उ, ऋ इत्येषां कार्यद्वयं सम्भवति—
१. गुणादेशः | नाम इ → ए, उ → ओ, ऋ → अर् |
२. यण् आदेशः (**इको यणचि**) | नाम इ → य्, उ → व्, ऋ → र् |

अधुना इतोऽपि द्वे कार्ये सम्भवतः इति बोध्यम्—
३. इयङ्, उवङ् आदेशौ | इ → इय्, उ → उव् |
४. रिङ् इत्यादेशः | ऋ → रि |
कुत्र एतादृशकार्ययोः अवसरः प्राप्तः इति अधः पश्येम |

a. इकारान्तधातवः (4 धातवः)

श इति विकरणप्रत्ययः अजादिः अपित् इति कारणतः एकं सूत्रम् अत्र कार्यं करोति— **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | अनेन इकारान्तधातूनाम् इयङ् आदेशः भवति अजाद्यपिति प्रत्यये परे | क्रमेण इदं कार्यम् अवलोकयेम | तुदादिगणीयः रि गतौ इति धातुः |

१. अयं रि–धातुः यदि भ्वादिगणे अभविष्यत्, तर्हि लटि किं रूपम् अभविष्यत् इति चिन्तयेम | रि + लट् → रि + ति → रि + शप् + ति → रि + अ + ति → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → रे + अ + ति → **एचोऽयवायावः** इत्यनेन अयादेशः → रय् + अ + ति = रयति | इदं केवलं चिन्तनार्थम्; अयं रि–धातुः भ्वादौ नास्ति अतः इदं रूपं न सम्भवति |

२. तुदादिगणे सामान्यचिन्तनम् अकरिष्याम, तर्हि रि–धातोः लटि किं रूपम् अभविष्यत् इति चिन्तयेम | रि + लट् → रि + ति → रि + श + ति → रि + अ + ति → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** इत्यनेन श ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → रि + अ + ति → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → र्यति | इदं केवलं चिन्तनार्थम्; अयं रि–धातुः तुदादिगणे सामान्यधातुः नास्ति अतः इदं रूपं न सम्भवति |

३. वस्तुस्थितिः का इति अग्रे पश्येम | रि + लट् → रि + ति → रि + श + ति → रि + अ + ति → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** इत्यनेन श ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → रि + अ + ति → **इको यणचि** (६.१.७७) इत्यनेन यण्–सन्धेः प्राप्तिः → श–प्रत्ययः अजादिः अपित् अतः **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन यण्–सन्धिं प्रबाध्य इयङ् आदेशः भवति |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः), इकारान्त–उकारान्तधातुरूपि–अङ्गस्य, भ्रू–प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि–प्रत्यये परे | श्नु–प्रसङ्गे **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः; अनेन यस्य अङ्गस्य अन्ते श्नु–प्रत्ययः स्यात्, तस्मात् इत्यर्थः | य्वोः इति विशेषणं "धातु" शब्दस्य एव यतोहि श्नुप्रत्ययान्ताङ्गम्, भ्रू प्रातिपदिकम् च उकारान्तः एव अतः तत्र इयङ् इत्यस्य प्रसक्तिः नास्ति | तर्हि 'धातु' इत्येव अवशिष्यते यस्य कृते य्वोः इति विशेषणं योग्यम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन यस्य धातोः अन्ते इकार–उकारः स्यात् इति अर्थः | श्नुश्च धातुश्च, भ्रुश्च तयोः इतरेतरद्वन्द्वः श्नुधातुभ्रुवः, तेषां श्नुधातुभ्रुवाम् | इश्च उश्च तयोः इतरेतरद्वन्द्वः यू, तयोः य्वोः | इयङ् च उवङ् च तयोः इतरेतरद्वन्द्वः, इयङुवङौ | अचि सप्तम्यन्तं, श्नुधातुभ्रुवां षष्ठ्यन्तं, य्वोः षष्ठ्यन्तम्, इयङुवङौ प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

मनसि भवेत् यत् अस्मिन् सूत्रे "किति ङिति" इति न उक्तं, परन्तु प्रत्ययः कित्–ङित् नास्ति चेत् इगन्तानां धातूनाम् इकः गुणः अतः तत्र **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्य प्राप्तिः नास्ति | तत्रापि प्रसक्तिः आसीत्, परन्तु **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य परसूत्रत्वात् बलवत् |

**अनेकाल्शित् सर्वस्य** (१.१.५५) इति सूत्रं वक्ति यत् आदेशः अनेकाल् अस्ति चेत् (आदेशे एक एव वर्णः न अपि तु अनेके वर्णाः), तर्हि सर्वस्य, नाम सर्वाङ्गस्य स्थाने आदेशः आयाति | इयङ् इत्यस्मिन् आदेशे अकार–ङकारयोः इत्–संज्ञा भवतः अतः इय् इति

अवशिष्यते | इय् इत्यस्मिन् एक एव वर्णः न अपि तु तस्मात् अधिकाः वर्णाः ("इ", "य्" इति), अतः अनेकाल् अस्ति | इदं सूत्रम् **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | तर्हि अत्र पूर्णस्य "रि" इत्यस्य स्थाने इयङ् भवतु इति इदं सूत्रं विदधाति | परन्तु **ङिच्च** (१.१.५३), **अनेकाल्शित् सर्वस्य** इत्यस्य अपवादभूतसूत्रम् | **ङिच्च** इति सूत्रेण आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः | अतः रि–धातौ इकारस्थाने इय्–आदेशः |

**अनेकाल्शित् सर्वस्य** (१.१.५५) = आदेशः अनेकाल् (आदेशे एक एव वर्णः न अपि तु अनेके वर्णाः) अथवा शित् चेत्, सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | (यस्य स्थाने आदेशः आदिष्टः, सः स्थानी |) इदं सूत्रम् **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | न एकः अनेकः नञ्तत्पुरुषः; अनेकः अल् यस्य सः अनेकाल् बहुब्रीहिः; शकारः इत् यस्य सः शित् बहुब्रीहिः; अनेकाल् च शित् च अनेकाल्शित् समाहारद्वन्द्वः | अनेकाल् प्रथमान्तं, शित् प्रथमान्तं, सर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अनेकाल्शित् सर्वस्य स्थाने** |

**ङिच्च** (१.१.५३) = ङित्–आदेशः अनेकाल् चेदपि अन्त्यस्य एव स्थाने भवति | इदं सूत्रम् **अनेकाल्शित् सर्वस्य** (१.१.५५) इति सूत्रस्य अपवादः; **अनेकाल्शित् सर्वस्य** (१.१.५५) तु **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | ङकारः इत यस्य सः ङित्, बहुव्रीहिः | ङित् प्रथमान्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्मात् **अलः**, **अन्त्यस्य** इत्यनयोः अनुवृत्तिः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **ङित् च अन्त्यस्य अलः स्थाने** |

रि गतौ → रि + श → रि + अ → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन अचि परे इयङ्–आदेशः → र् + इय् + अ → रिय इति अङ्गम् → रिय + ति → रियति

तुदादिगणे चत्वारः इकारान्तधातवः रि गतौ, पि गतौ, धि गतौ, क्षि गतौ | सर्वेषाम् अर्थः 'गच्छति', अपि च सर्वेषां कार्यं रि यथावत् अतः रियति, पियति, धियति, क्षियति |

b. <u>उकारान्त/ऊकारान्तधातवः</u> (6 धातवः)

श इति विकरणप्रत्ययः अजादिः अपित् इति उक्तं; तस्मात् कारणात् अत्र पुनः इदं सूत्रम् प्रवर्तते— **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | अनेन उकारान्तधातूनाम् उवङ् आदेशः भवति अजाद्यपिति प्रत्यये परे | क्रमेण इदं कार्यम् अवलोकयेम | तुदादिगणीयः गु पुरीषोत्सर्गे इति धातुः |

१. अयं गु–धातुः यदि भ्वादिगणे अभविष्यत्, तर्हि लटि किं रूपम् अभविष्यत् इति चिन्तयेम | गु + लट् → गु + ति → गु + शप् + ति → गु + अ + ति → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → गो + अ + ति → **एचोऽयवायावः** इत्यनेन अवादेशः → गव् + अ + ति → गवति | इदं केवलं चिन्तनार्थम्; अयं गु–धातुः भ्वादौ नास्ति अतः इदं रूपं न सम्भवति |

२. यदि तुदादिगणे सामान्यचिन्तनम् अकरिष्याम, तर्हि लटि किं रूपम् अभविष्यत् इति चिन्तयेम | गु + लट् → गु + ति → गु + श

+ ति → गु + अ + ति → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** इत्यनेन श ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → गु + अ + ति → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → ग्वति | इदं केवलं चिन्तनार्थम्; अयं गु–धातुः तुदादिगणे सामान्यधातुः नास्ति अतः इदं रूपं न सम्भवति |

३. वस्तुस्थितिः का इति अग्रे पश्येम | गु + लट् → गु + ति → गु + श + ति → गु + अ + ति → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** इत्यनेन श ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → गु + अ + ति → **इको यणचि** (६.१.७७) इत्यनेन यण्–सन्धेः प्राप्तिः → श–प्रत्ययः अजादिः अपित् अतः **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन यण्–सन्धिं प्रबाध्य उवङ्–आदेशः भवति |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य अर्थः उपरि दत्तः | अत्र गु–धातुः उकारान्तः अतः उकारस्य स्थाने उवङ्–आदेशः न तु इयङ्, इत्येव भेदः— यतोहि सूत्रेण उक्तं यत् इकारान्तधातोः स्थाने इयङ्, उकारान्तधातोः स्थाने उवङ् | तदा उवङ् आदेशः कस्य स्थाने इति चेत्, पुनः **अनेकाल् शित्सर्वस्य** इत्यस्य अपवादे **ङिच्च** सूचयति यत् ङित्त्वात् अन्त्यस्य एव आदेशः | अतः यण् प्रबाध्य उवङ्–आदेशः भवति अन्त्यस्य उकारस्य स्थाने |

गु पुरीषोत्सर्गे → गु + श → गु + अ → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन अचि परे उवङ्–आदेशः → ग् + उव् + अ → गुव इति अङ्गम् → गुव + ति → गुवति

तुदादिगणे षट् उकारान्तधातवः गु, ध्रु, कुङ्, णू, धू, षू | एषां सर्वेषां कार्यं गु–धातोः यथावत् अतः गुवति, ध्रुवति, कुवते (ङित् अतः आत्मनेपदिधातुः), नुवति, धुवति, सुवति |

गु पुरीषोत्सर्गे → गुवति
ध्रु गतिस्थैर्ययोः (गच्छति, स्थिरः भवति) → ध्रुव इति अङ्गम् → ध्रुव + ति → ध्रुवति
कुङ् शब्दे (ध्वनिं करोति) → कुव इति अङ्गम् → कुव + ते → कुवते
णू स्तवने (स्तुतिं करोति, प्रशंसां करोति) → **णो नः** (६.१.६५) → नू + श → नुव इति अङ्गम् → नुव + ति → नुवति
धू विधूनने (बाधति, कम्पनं कारयति) → धुव इति अङ्गम् → धुव + ति → धुवति
षू प्रेरणे (प्रेरयति) → **धात्वादेः षः सः** (६.१.६४) → सू + श → सुव इति अङ्गम् → सुव + ति → सुवति

c. ऋकारान्तधातवः

तुदादिगणे चत्वारः ऋकारान्तधातवः सन्ति— मृङ्, पृङ्, दृङ्, धृङ् च | इमे सर्वे ङितः अतः **अनुदात्तङित आत्मनेपदम्** (१.३.१२) इत्यनेन आत्मनेपदिनः |

तुदादिगणे शपं प्रबाध्य श–विकरणप्रत्ययः आयाति इति ज्ञातम् | तस्मात् कारणात् अत्र **रिङ्शयग्लिङ्क्षु** (७.४.२८) इति सूत्रं कार्यं करोति | अनेन ऋकारान्तधातूनां रिङ्–आदेशः भवति, श–प्रत्यये परे | क्रमेण इदं कार्यम् अवलोकयेम | तुदादिगणीयः मृङ् प्राणत्यागे

इति धातुः |

१. अयं मृङ्–धातुः यदि भ्वादिगणे अभविष्यत्, तर्हि लटि किं रूपम् अभविष्यत् इति चिन्तयेम | ङकारस्य इत्–संज्ञा अतः मृ अवशिष्यते; ङित् अतः **अनुदात्तङित आत्मनेपदम्** (१.३.१२) इत्यनेन आत्मनेपदिधातुः |

मृ + शप् → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → मर् + अ → मर इति अङ्गम् → मर + ते = मरते | इदं केवलं चिन्तनार्थम्; अयं मृङ्–धातुः भ्वादौ नास्ति अतः इदं रूपं न सम्भवति |

२. यदि तुदादिगणे सामान्यचिन्तनम् अकरिष्याम, तर्हि लटि किं रूपम् अभविष्यत् इति चिन्तयेम |

मृ + श → मृ + अ → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** इत्यनेन श ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → म्र इति अङ्गम् → म्र + ते → म्रते | इदं केवलं चिन्तनार्थम्; वास्तवे **इको यणचि** बाधितम् अस्ति अतः इदं रूपं न सम्भवति |

३. वस्तुस्थितिः का इति अग्रे पश्येम |

मृङ् प्राणत्यागे → मृ + श → मृ + अ → **इको यणचि** (६.१.७७) इत्यस्य प्राप्तिः, तत् प्रबाध्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुण–प्राप्तिः, **सार्वधातुकमपित्** (१.२.४) इत्यनेन अपित्त्वात् ङिद्वत्, **क्क्ङिति च** (१.१.५) इत्यनेन ङित्त्वात् गुणनिषेधः → **रिङ् शयग्लिङ्क्षु** (७.४.२८) इत्यनेन श–प्रत्यये परे ऋकारान्तस्य अङ्गस्य रिङ्–आदेशः (मृ–धातोः पूर्णतया स्थाने रि); **ङिच्च** (१.१.५३) इत्यनेन आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः → म् + रि + अ → म्रि + अ → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → श–प्रत्ययः अजादिः अपित् अतः यण्–सन्धिं प्रबाध्य **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् आदेशः → इयङ् आदेशः ङित् अतः **ङिच्च** इत्यनेन अन्त्यस्य एव आदेशः, इकारस्य स्थाने इय्–आदेशः → म्् + इय् + अ → म्रिय् + अ → म्रिय इति अङ्गम् → म्रिय + ते → म्रियते

अत्र एकः प्रश्नः उदेति— यदा रिङ्–आदेशः विहितः, तदा म्रि इति रूपम् | अस्यां स्थित्यां धातुसंज्ञा नास्ति किल, तर्हि **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य प्रसक्तिः कथम् ?

आदेशस्य योजनेन आगमस्य योजनेन च धातुः धातुरेव तिष्ठति; स्वस्य धातुसंज्ञा तिष्ठति | **स्थानिवदादेशोऽनल्विधौ** (१.१.५६) इति सूत्रेण आदेशः स्थानिवद्भवति | आगमाः तु यस्य आगमः तस्य अवयवः भवति **यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते** इति परिभाषया | मृ → म्रि इत्यस्य विकारेण म्रि तदानीं धातुः; तस्य धातुसंज्ञा तदानीम् अस्ति | यतः रि इति आदेशः | अनन्तरम् इयङ् इति आदेशस्य संयोजनेन अपि धातुसंज्ञा वर्तते | म्रि → म्रिय् अयमपि धातुः | परन्तु एकवारं यदा विकरणप्रत्ययः संयोजितः, तदा धातुसंज्ञा न तिष्ठति | म्रिय् + अ → म्रिय | श इति विकरणप्रत्ययः; तस्य पृथक् प्रत्ययसंज्ञा अस्ति अतः तस्य संयोजनेन म्रिय इति अधुना धातुः नास्ति | अस्यां दशायां धातुसंज्ञा न तिष्ठति, अधुना अङ्गसंज्ञा एव वर्तते |

तुदादिगणे चत्वारः ऋकारान्तधातवः—

मृङ् प्राणत्यागे → म्रियते

पृङ् व्यायामे (कार्ये निमग्नः भवति) → प्रियते

दृङ् आदरे (आदरं प्रकटयति) → द्रियते

धृङ् अवस्थाने (स्थितः भवति, जीवितः भवति) → ध्रियते

**रिङ् शयग्लिङ्क्षु** (७.४.२८) = ऋकारान्तस्य अङ्गस्य रिङ्-आदेशो भवति श-प्रत्यये, यक्-प्रत्यये, यकारादि-आर्धधातुक-लिङ्-प्रत्यये च परे | शश्च यक् च लिङ् च तेषामितरेतरद्वन्द्वः शयग्लिङः, तेषु शयग्लिङ्क्षु | रिङ् प्रथमान्तं, शयग्लिङ्क्षु सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **अयङ् यि क्ङिति** (७.४.२२) इत्यस्मात् **यि**, **अकृत्सार्वधातुकयोर्दीर्घः** (७.४.२५) इत्यस्मात् **असार्वधातुके**, **रीङ् ऋतः** (७.४.२७) इत्यस्मात् **ऋतः** इत्येषाम् अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ऋतः अङ्गस्य रिङ् यि असार्वधातुके शयग्लिङ्क्षु** |

**यस्मिन् विधिः तदादावल्ग्रहणे** इति परिभाषया **यि** नाम यकारादौ (यस्य आदौ यकारः, तस्मिन् परे) | **यि असार्वधातुके** च लिङः विशेषणम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन **ऋतः अङ्गस्य** नाम न केवलम् ऋकारस्य इत्यङ्गस्य, अपि तु ऋकारान्तस्य अङ्गस्य | **रिङ्** ङित्, अतः **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य बाधकसूत्रम् **अनेकाल् शित्सर्वस्य** (१.१.५५), तत् प्रबाध्य **ङिच्च** (१.१.५३) इति सूत्रेण आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः|

**येन विधिस्तदन्तस्य** (१.१.७२) = विशेषणं तदन्तस्य अपि भवति, स्वस्यापि भवति | सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य बहुव्रीहिः | विधीयते इति विधिः | येन तृतीयान्तम्, विधिः प्रथमान्तम्, तदन्तस्य षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वम्**, **रूपम्** इत्यनयोः अनुवृत्तिः | विभक्तिपरिणामः इत्यनेन षष्ठ्यन्ते भवतः, **स्वस्य रूपस्य** | अनुवृत्ति-सहितसूत्रम्— **येन विधिः तदन्तस्य स्वस्य रूपस्य** (च)| परिभाषासूत्रम् |

**ङिच्च** (१.१.५३) = ङित्-आदेशः अनेकाल् चेदपि अन्त्यस्य एव स्थाने भवति | इदं सूत्रम् **अनेकाल्शित् सर्वस्य** (१.१.५५) इति सूत्रस्य अपवादः; **अनेकाल्शित् सर्वस्य** (१.१.५५) तु **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | ङकारः इत यस्य सः ङित्, बहुव्रीहिः | ङित् प्रथमान्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्मात् **अलः**, **अन्त्यस्य** इत्यनयोः अनुवृत्तिः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **ङित् च अन्त्यस्य अलः स्थाने** |

***हलि च** इति सूत्रे यथा, तथैव **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रे अपिति परे, किति परे, ङिति परे वा नोक्तम्, न वा अनुवृत्तौ अस्ति | परन्तु अनयोः सूत्रयोः कार्यं न सम्भवति पिति परे | अतः पाणिनेः वदनस्य आवश्यकता नासीत् | "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इत्युच्यते | अर्धमात्रायाः अपि व्यर्थता न भवति | अत्र अस्माभिः अनुमानेन अवगतमेव |

d. <u>दीर्घ-ॠकारान्तधातवः</u> (द्वौ धातू स्तः)

तुदादिगणे कॄ विक्षेपे (क्षिपति, प्रसारयति), गॄ निगरणे इति द्वौ ॠकारान्तधातू स्तः |

अधुना अस्माभिः दृष्टं यत् ह्रस्व–ऋकारान्तधातूनां रिङ्–आदेशः भवति, यथा मृङ् → रिङ् आदेशः → म्रि → इयङ् आदेशः → म्रिय् + श–विकरणप्रत्ययः → म्रिय इति अङ्गम् + ते → म्रियते

दीर्घॠकारान्तधातूनां क्रमः भिन्नः |

स्मर्यते यत् दिवादिगणे दीर्घॠकारान्तधातुषु ॠकारस्य स्थाने इ–आदेशः जॄ → जि | तुदादिगणे अपि तथा; उभयत्र **ॠत इद्धातोः** (७.१.१००) इत्यस्य प्रसक्तिः | परन्तु ततः अग्रे भिद्यते यतोहि दिवादिगणे श्यन् हलादिः अपित्; किन्तु तुदादिगणे श अजादिः अपित् | दिवादिगणे **हलि च** इत्यनेन उपधायाम् इकः दीर्घत्वम्, परन्तु तुदादिगणे **हलि च** इत्यस्य प्रसक्तिः नास्ति अतः उपधायाम् इक् ह्रस्वः तिष्ठति | अग्रे क्रमः प्रदत्तः अस्ति— कॄ इति धातुः |

कॄ + श → कॄ + अ → **इको यणचि** (६.१.७७) इत्यनेन यण्–सन्धेः प्राप्तिः → तं प्रबाध्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** (१.२.४) इत्यनेन श ङिद्वत्, **क्ङिति च** (१.१.५) इत्यनेन गुणनिषेधः → कॄ + अ → **ॠत इद्धातोः** (७.१.१००) इत्यनेन ॠदन्तस्य धातोः ह्रस्व–इकारादेशः → कि + अ → **उरण् रपरः** (१.१.५१) इत्यनेन ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः → किर् → किर् + अ → किर इति अङ्गम् → किर + ति → किरति

**ॠत इद् धातोः** (७.१.१००) = ॠदन्तस्य धातोः अङ्गस्य ह्रस्व–इकारादेशो भवति (किति ङिति प्रत्यये परे) | कित्–ङित् भिन्नप्रत्ययः परे चेत्, गुणे सति इकारादेशस्य प्रसक्तिर्न भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य ॠकारस्य स्थाने ह्रस्व–इकारादेशः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन **ॠतः** इत्यनेन ॠदन्तस्य इत्यस्यापि ग्रहणम् | ॠतः षष्ठ्यन्तम्, इत् प्रथमान्तम्, धातोः षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ॠतः धातोः अङ्गस्य इत्** |

**अलोऽन्त्यस्य** (१.१.५२) = षष्ठीविभक्ति–द्वारा यस्य पदस्य स्थाने आदेशः प्राप्तः, सः आदेशः अन्त्यस्य अल्–वर्णस्य स्थाने भवति | अलः षष्ठ्यन्तम्, अन्त्यस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् **षष्ठी, स्थाने** इत्यनयोः अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **षष्ठ्या अन्त्यस्य अलः स्थाने** (विद्यमानः आदेशः) | परिभाषासूत्रम् |

**येन विधिस्तदन्तस्य** (१.१.७२) = विशेषणं तदन्तस्य अपि भवति, स्वस्यापि भवति | सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य बहुव्रीहिः | विधीयते इति विधिः | येन तृतीयान्तम्, विधिः प्रथमान्तम्, तदन्तस्य षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वम्, रूपम्** इत्यनयोः अनुवृत्तिः | विभक्तिपरिणामः इत्यनेन षष्ठ्यन्ते भवतः, **स्वस्य रूपस्य** | अनुवृत्ति–सहितसूत्रम्— **येन विधिः तदन्तस्य स्वस्य रूपस्य** (च)| परिभाषासूत्रम् |

**उरण् रपरः** (१.१.५१) = ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः भवति | ऋकारेण त्रिंशत्–प्रकारकः ऋकारः भवति इति बोध्यम् | रः परो यस्य सः रपरः | उः षष्ठ्यन्तम्, अण् प्रथमान्तम्, रपरः प्रथमान्तम्, त्रिपदमिदं सूत्रम् |

**स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **उः स्थाने अण् रपरः** |

ऋकारस्य स्थाने यदा अण्-प्रत्याहारस्य कश्चन सदस्यः ('अ', 'इ, 'उ' वा) आयाति, तदा तस्मात् रेफः आयाति | अतः अण् "रपरः" भवति— 'अर्', 'इर्', 'उर्' वा इति | अत्र ऋकारस्य स्थाने इ आगतः, अतः रपरः भवति, इर् इति | कि → किर् |

गॄ धातुः अपि तथा | गॄ + अ → गि + अ → गिर् + अ→ गिर इति अङ्गम् → गिर + ति → गिरति

दिवादिगणे क्रमः तथैव अस्ति, किन्तु अन्ते इकारः दीर्घः भवति—

जॄ → (**ॠत इद्धातोः**) जि → (**उरण् रपरः**) जिर् → (**हलि च**) जीर् + (श्यन् विकरणप्रत्ययः) य → जीर्य इति अङ्गम् → जीर्य + ते → जीर्यते

**हलि च** (८.२.७७) इत्यनेन हलि परे रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्-वर्णः दीर्घो भवति | दिवादिगणे श्यन् हलादिः अपित् अस्ति; तुदादिगणे श अजादिः अपित् अस्ति | अतः दिवादौ ॠकारान्तधातुषु **हलि च** इत्यस्य प्रसक्तिः; तुदादौ अस्यामेव दशायां **हलि च** कार्यं न करोति |

अत्र **उरण् रपरः** इत्यस्य सम्यक्तया बोधार्थं गुणसन्धिम् एकवारम् अवलोकयाम |

अ/आ + इ/ई = ए
अ/आ + उ/ऊ = ओ
अ/आ + ऋ/ॠ = अर्

इति सामान्यनियमः अस्ति | परन्तु गुणसंज्ञा-विधायकसूत्रम् **अदेङ्ग गुणः** (१.१.२) इत्यनेन अ, ए, ओ इत्येषाम् एव वर्णानां गुणसंज्ञा भवति | तत्र "अर्" किमपि नास्ति | यत्र गुणसन्धिः अपेक्षितः, तत्र **आद्गुणः** (६.१.८७) इत्यनेन अवर्णात् अचि परे पूर्वपरयोः एकः गुणादेशः भवति | गुणादेशः नाम पूर्वपरयोः स्थाने 'अ' वा, 'ए' वा 'ओ' वा आगच्छेत् | तत्र "अर्" तु नास्त्येव | तर्हि अ + ऋ → अर् कथम् ? वस्तुतः ऋकारस्य गुणसन्धिः एवं भवति— अ + ऋ → "अ, ए, ओ" इत्येषु गुणसंज्ञकवर्णेषु कश्चन स्वीकर्तव्यः | अधुना **स्थानेऽन्तरतमः** इति सूत्रेण ध्वनि-दृष्ट्या तेषु त्रिषु, द्वयोः वर्णयोः स्थाने कस्य गुणसंज्ञकवर्णस्य उच्चारणार्थं "स्थान-तौल्यम्" अस्ति इति अवलोकनीयं भवति | अकारस्य कण्ठस्थानम्, ऋकारस्य मूर्धास्थानम् | अ, ए, ओ इति गुणसंज्ञकवर्णेषु कस्यापि कण्ठमूर्धास्थानं नास्ति | (अ= कण्ठस्थानम्, ए= कण्ठतालुस्थानम्, ओ= कण्ठोष्ठस्थानम् इति |) तेषु त्रिषु, अ-ऋ इत्यनयोः स्थाने अकारस्य एव अधिकसाम्यं वर्तते | अतः अ-ऋ इत्यनयोः स्थाने "अ" इत्यस्य गुणादेशप्राप्तिः | अधुना ऋ-स्थाने यः अकारः आगतः, सः अण्-प्रत्याहारस्य सदस्यः, अतः **उरण् रपरः** इत्यनेन रेफः परः भवति | तर्हि आहत्य अ/आ + ऋ/ॠ → **आद्गुणः** इत्यनेन पूर्वपरयोः स्थाने 'अ' → **उरण् रपरः** → अर् | महा + ऋषिः → मह् + अर् + षि → महर्षिः |

अवधेयं यत् **ॠत इद्धातोः** इति सूत्रं किति ङिति प्रत्यये परे एव कार्यं करोति | अतः सार्वधातुकलकारेषु यत्र विकरणप्रत्ययः अपित्

नास्ति, तत्र यद्यपि प्रसक्तिः तु अस्ति, किन्तु प्राप्तिः न भविष्यति | वृत्तान्ते भ्वादिगणे तॄ इति धातुः | यद्यपि ॠकारान्तधातुः अस्ति, तथापि **ॠत इद्धातोः** इत्यनेन ॠ–स्थाने इकारादेशः न भवति | भ्वादिगणे शप् पित् अस्ति अतः **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणः भवति | तॄ + शप् → तॄ + अ → तर् + अ → तर इति अङ्गम् → तर + ति → तरति |

अतः गणम् अनुसृत्य ॠकारान्तधातूनां कः भेदः इति पश्येम—

भ्वादिगणे तॄ → गुणः → तरति

दिवादिगणे जॄ → इ–आदेशः, **हलि च** दीर्घः → जीर्यति

तुदादिगणे कॄ → इ–आदेशः, अजादिः अपित् अतः न दीर्घः → किरति

केचन जनाः वदन्ति यत् भ्वादितुदादिगणयोः विषयः भ्रमात्मकः, कः धातुः कस्मिन् गणे इति | किन्तु यत्र गणसम्बद्धकार्यं वर्तते, तत्र अस्माकं न कोऽपि भ्रमः स्यात् | भ्वादिगणे गुणकार्यं प्रवर्तते; तुदादिगणे न कुत्रापि गुणकार्यम् | तुदादिगणे विकरणप्रत्ययः अजादिः अपित् अतः सामान्यम् अपित्–निमित्तं कार्यम् अपि, विशिष्टम् अजादि–अपित्–निमित्तं कार्यम् अपि भवतः, ये भ्वादौ न सञ्जायेते | यथा दीर्घ–ॠकारः → इ–कारः प्रवर्तते केषुचिदपि अपित्सु प्रत्ययेषु, अतः दिवादौ अपि (जॄ → जीर्यति), तुदादौ अपि (कॄ → किरति) | इयङ्–आदेशः किन्तु अजादिषु अपित्सु एव प्रवर्तते (**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ**) | रि + अ → रियति |

Swarup – May 2013 (updated July 2015)